विश्वेश्वरः, पुं, ( विश्वस्य ईश्वरः । ) काशीस्थ-महादेवः । यथा,—
"सर्व्वतीर्थेषु सस्नौ स सर्व्वयात्रां चचार स च ।
मणिकर्ण्यान्तु यः स्नातो यो विश्वेशं निरैक्षत ॥
सत्यं सत्यं पुनः सत्यं सत्यं सत्यं पुनः पुनः ।
दृष्टो विश्वेश्वरो नित्यं स्नातव्या मणिकर्णिका ॥"
इति काशीखण्डम् ॥
( यथाच तन्त्रे ।
"सुखेन वाद्यं सलिलेन पाद्यं
मूर्त्तिस्तदा विल्वदलेन पूजा ।
फलं पुनस्तस्य भवेदनन्तं
निःस्वस्य विश्वेश्वर एव देवः ॥")

विश्वौषधं, क्ली, ( विश्वेषामौषधम् । ) शुण्ठी । इति राजनिर्घण्टः ॥

विष, इर् लि ञ औ ड व्याप्तौ । इति कविकल्पद्रुमः ॥ (ह्वा०-उभ०-आत्म०-इत्येके-सक०-अनिट् ।) इर्, अविषत् अविक्षत् । लि ञ, वेवेष्टि वेविष्टे । औ, वेष्टा । ड, वेविष्टे । उभयपदीत्यन्ये । अपक्षयत् कर्त्तरि आत्मने पदार्थो डकारः । इति दुर्गादासः ॥

विष, उ सेचने । इति कविकल्पद्रुमः ॥ ( भ्वा०-पर०-सक०-सेट् । क्त्वावेट् । ) उ, वेषित्वा विष्ट्वा । इति दुर्गादासः ॥

विष, श औ विप्रयोगे । इति कविकल्पद्रुमः ॥ ( क्र्या०-पर०-अक०-अनिट् । ) श, विष्णाति प्राणी पुत्रादिभ्यो वियुक्तः स्यात् इत्यर्थः । औ, अविक्षत् । इन्त्यान्तोऽयमिति । विष्णुव्युत्पत्तौ सुभूतिः । इति दुर्गादासः ॥

विषं, क्ली, ( विष सेचने+कः । ) जलम् । इत्यमरः । पद्मकेशरम् । इति तट्टीकायां मुकुटः ॥ बोलम् । वत्सनाभः । सामान्यविषम् । इति राजनिर्घण्टः ॥

विषः, पुं, क्ली, (विष+कः ।) विषम् । तत्पर्य्यायः । क्ष्वेडः २ गरलम् ३ । इत्यमरः ॥ आहेयम् ४ अमृतम् ५ गरदम् ६ कालकूटम् ७ काकोलम् ८ हारिद्रम् ९ रक्तशृङ्गिकम् १० नीलम् ११ गरम् १२ घोरम् १३ हालाहलम् १४ हलाहलम् १५ शृङ्गी १६ भूगरम् १७ । इति राजनिर्घण्टः ॥ जाङ्गलम् १८ तीक्ष्णम् १९ रसः २० रसायनम् २१ गरः २२ । इति जटाधरः । जहुलम् २३ जाहुलम् २४ । इति शब्दरत्नावली ॥ काकोलः २५ वत्सनाभः २६ प्रदीपनः २७ शौल्किकेयः २८ ब्रह्मपुत्त्रः २९ । इति रत्नमाला ॥ तद्भेदा यथा,—
"पुंसि क्लीवे च काकोलकालकूटहलाहलाः ।
सौराष्ट्रिकः शौल्किकेयो ब्रह्मपुत्त्रः प्रदीपनः ॥
दारदो वत्सनाभश्च विषभेदा अमी नव ॥"
इति पातालवर्गे अमरः ॥ * ॥
अपि च ।
"विषः क्ष्वेडो रसस्तीक्ष्णं गरलोऽथ हलाहलः ।
वत्सनाभः कालकूटो ब्रह्मपुत्त्रः प्रदीपनः ॥
सौराष्ट्रिकः शौल्किकेयः काकोलो दारदोऽपि च ।
अहिच्छत्रो मेषशृङ्गकुष्ठवालूकनन्दनाः ॥
कैराटको हैमवतो मर्कटः करवीरकः ।
सर्षपो मूलको गौरार्द्रकः सक्तुककर्द्दमौ ॥
अङ्कोलसारः कालिङ्गः शृङ्गिको मधुसिक्थकः ।
इन्द्रो लाङ्गलिको विस्फुलिङ्गपिङ्गलगौतमाः ।
मुस्तको दालवश्चेति स्थावरा विषजातयः ॥"
इति हेमचन्द्रः ।
अथ विषस्य नामलक्षणगुणाः ।
"विषं तु गरलं क्ष्वेडस्तस्य भेदानुदाहरेत् ।
वत्सनाभः सहारिद्रः सक्तुकश्च प्रदीपनः ॥
सौराष्ट्रिकः शृङ्गकश्च कालकूटस्तथैव च ।
हालाहलो ब्रह्मपुत्त्रो विषभेदा अमी नव ॥"
तत्र वत्सनाभस्य स्वरूपनिरूपणम् ।
"सिन्धुवारसदृक्पत्रो वत्सनाभ्याकृतिस्तथा ।
यत्पार्श्वे न तरोर्वृद्धिर्व्वत्सनाभः स भाषितः ॥"
अथ हारिद्रस्य स्वरूपम् ।
"हरिद्रातुल्यमूलो यो हारिद्रः स उदाहृतः ॥"
अथ सक्तुकस्य स्वरूपम् ।
"यद्ग्रन्थिः सक्तुकेनेव पूर्णमध्यः स सक्तुकः ।"
अथ प्रदीपनस्य स्वरूपम् ।
"प्रदीपलोहितो यः स्याद्दीप्तिमान् ज्वलनप्रभः ।
महादाहकरः पूर्व्वैः कथितः स प्रदीपनः ॥"
अथ सौराष्ट्रिकस्य स्वरूपम् ।
"सुराष्ट्रविषये यः स्यात् स सौराष्ट्रिक उच्यते ।"
अथ शृङ्गकस्य स्वरूपम् ।
"यस्मिन् गोशृङ्गके बद्धे दुग्धं भवति लोहितम् ।
स शृङ्गक इति प्रोक्तो द्रव्यतत्त्वविशारदैः ॥"
अथ कालकूटस्य स्वरूपम् ।
"देवासुररणे देवैर्हतस्य पृथुमालिनः ।
दैत्यस्य रुधिराज्जातस्तरुरश्वत्थसन्निभः ॥
निर्यासः कालकूटोऽस्य मुनिभिः परिकीर्त्तितः ।
सोऽहिच्छत्रे शृङ्गवेरे कोङ्कणे मलये भवेत् ॥"
अथ हालाहलस्य स्वरूपम् ।
"गोस्तनाभफलो गुच्छस्तालपत्रच्छदस्तथा ।
तेजसा यस्य दह्यन्ते समीपस्था द्रुमादयः ॥
असौ हालाहलो ज्ञेयः किष्किन्धायां हिमालये ।
दक्षिणाब्धितटे देशे कोङ्कणेऽपि च जायते ॥"
अथ ब्रह्मपुत्त्रस्य स्वरूपम् ।
"वर्णतः कपिलो यः स्यात् तथा भवति साधकः ।
ब्रह्मपुत्त्रः स विज्ञेयो जायते मलयाचले ॥
ब्राह्मणः पाण्डरस्तेषु क्षत्त्रियो लोहितप्रभः ।
वैश्यः पीतोऽसितः शूद्रो विष उक्तश्चतुर्विधः ।
रसायने विषं विप्रं क्षत्त्रियं देहपुष्टये ।
वैश्यं कुष्ठविनाशाय शूद्रं दद्याद्वधाय हि ॥"
अथ विषस्य गुणाः ।
"विषं प्राणहरं प्रोक्तं व्यवायि च विकाशि च ।
आग्नेयं वातकफहृद्योगवाहि मदावहम् ॥"
व्यवायि सकलकायगुणव्यापनपूर्व्वकपाकागमनशीलम् । विकाशि ओजःशोषणपूर्व्वकं सन्धिबन्धशिथिलीकरणशीलम् । आग्नेयं अधिकाग्न्यंशम् । योगवाहि संसर्गगुणवाहकम् ।
"मदावहं तमोगुणाधिक्येन बुद्धिविध्वंसकम् ।
तदेव युक्तियुक्तन्तु प्राणदायि रसायनम् ॥
योगवाहि परं वातश्लेष्मजित् सन्निपातहृत् ।
योगवाहि त्रिदोषघ्नं बृंहणं वीर्य्यवर्द्धनम् ॥
ये दुर्गुणा विषेऽशुद्धे ते स्युर्हीना विशोधनात् ।
तस्माद्विषं प्रयोगेषु शोधयित्वा प्रयोजयेत् ॥"
अथोपविषाणां निरूपणम् ।
"अर्कक्षीरं स्नुहीक्षीरं तथैव कलिहारिका ।
करवीरोऽथ धुस्तूरः पञ्च चोपविषाः स्मृताः ॥"
उपविषा गौणविषाः । एषां गुणास्तत्र तत्र द्रष्टव्याः । अपि च ।
"अर्कक्षीरं स्नुहीक्षीरं लाङ्गली करवीरकः ।
गुञ्जाहिफेनो धुस्तूरः सप्तोपविषजातयः ॥"
एतेषां शोधनं चिन्त्यम् । गुणास्तत्र द्रष्टव्याः ॥
अथ विषाणां शोधनविधिः ।
"गोमूत्रे त्रिदिनं स्थाप्यं विषं तेन विशुद्ध्यति ।
रक्तसर्षपतैलाक्तं तथा धार्य्यञ्च वाससि ॥
येगुणा गरले प्रोक्तास्ते स्युर्हीना विशोधनात् ॥
तस्माद्विषं प्रयोगेषु शोधयित्वा प्रयोजयेत ॥"
इति भावप्रकाशे पूर्व्वखण्डः ॥
अथ विषाधिकारः । तत्र विषस्य द्वैविध्यमाह ।
"स्थावरं जङ्गमञ्चैव द्विविधं विषमुच्यते ।
दशाधिष्ठानमाद्यन्तु द्वितीयं षोडशाश्रयम् ॥"
स्थावरविषस्य दशाश्रयानाह ।
"मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सारमेव च ।
निर्यासो धातवः कन्दः स्थावरस्याश्रया दश ॥"
तद्यथा । मूलविषं करवीरादि १ । पत्रविषं विषपत्रिकादि २ । फलविषं कर्कोटकादि ३ । पुष्पविषं वेत्रादि ४ । त्वक्सारनिर्यासविषाणि करम्भादीनि ५ । ६ । ७ । क्षीरविषं स्नुह्यादि ८ । धातुविषं हरितालादि ९ । कन्दविषं वत्सनाभसक्तुकादि १० ॥ * ॥ जङ्गमविषस्य षोडशाश्रयानाह ।
"दृष्टिनिश्वासदंष्ट्राश्च नखमूत्रमलानि च ।
शुक्रं लाला मुखं स्पर्शः संदंशश्चावमर्द्दितम् ।
गुदास्थिपित्तशूकानि दश षट् जङ्गमाश्रयाः ॥"
तद्यथा । दृष्टिनिश्वासविषा दिव्याः सर्पाः १।२। दंष्ट्राविषाः भौमाः सर्पाः ३ । दंष्ट्रानखविषा व्याघ्रादयः ४ । मूत्रपुरीषविषा गृहगोधिकादयः ५।६। शुक्रविषा मूषिकादयः ७। लालाविषा उच्चिटिङ्गादयः ८ । लालास्पर्शमलमूत्रार्त्तवशुक्रमुखसंदंशदंष्ट्रावमर्द्दितगुदपुरीषविषाश्चित्रशीर्षादयः ९।१०।११।१२।१३। अस्थिविषाः र्पादयः १४ । पित्तविषा शकुलमत्स्यादयः १५ । शूकविषा भ्रमरादयः १६ ॥ * ॥ स्थावरविषाणां सामान्यानां कार्य्याण्याह ।
"स्थावरन्तु ज्वरं हिक्कां दन्तहर्षं गलग्रहम् ।
फेनच्छर्द्यरुचिश्वासमूर्च्छाश्च कुरुते विषम् ॥"